## उदः स्थास्तम्भोः पूर्वस्य । (६१/११८)

[1]सवर्णः इति वर्तते । उदः उत्तरयोः स्था स्तम्भ इत्येतयोः पूर्वसवर्णादेशो भवति । उत्थाता । उत्थातुम् । उत्थातव्यम् । स्तम्भेः खल्वपि – उत्तम्भिता । उत्तम्भितुम् । उत्तम्भितव्यम् । स्थास्तम्भोः इति किम् ? [2]उत्स्नाता ।

[९६२] उदः पूर्वसवर्णत्वे स्कन्देश्छन्दस्युपसङ्ख्यानम्[3] । (म.भा.३. ४६५)

[4]अग्ने दूरमुत्कन्दः ॥

[९६३] रोगे चेति वक्तव्यम् । (म.भा.३. ४६५)

उत्कन्दको नाम रोगः । कन्दतेर्वा धात्वन्तरस्यैतद्रूपम् ॥

## झयो होऽन्यतरस्याम् । (६२/११९)

[5]झयः [6]उत्तरस्य पूर्वसवर्णादेशो भवति अन्यतरस्याम् । वाग्घसति, वाग्हसति । स्वलिड् ढसति, श्वलिड् हसति । अग्निचिद् धसति । अग्निचिद् हसति । सोमसुद् धसति, सोमसुद् हसति । त्रिष्टुब् भसति, त्रिष्टुब् हसति[7] । झयः इति किम् ? प्राङ हसति । भवान् हसति ॥

## शश्छोऽटि । (६३/१२०)

झयः इति वर्तते, अन्यतरस्याम् इति च । झय [8]उत्तरस्य शकारस्य अटि परतः छकारादेशो भवति अन्यतरस्याम् । वाक् छेते, वाक् शेते । अग्निचिच् छेते, अग्निचित् शेते । सोमसुच् छेते, सोमसुत् शेते । श्वलिट् छेते, श्वलिट् शेते[9] । त्रिष्टुप् छेते, त्रिष्टुप् शेते ।

[९६४] छत्वममीति वक्तव्यन् । (म. भा. ३. ४६५)

किं प्रयोजनम् ? तच्छ्लोकेन, तच्छ्मश्रुणा [10]इत्येवमर्थम् ॥

## हलो यमां यमि लोपः । (६४/६०)

[11]अन्यतरस्याम् इति वर्तते । हल उत्तरेषां यमां यमि परतो लोपो भवति अन्यतरस्याम् । शय्य्या इत्यत्र द्वौ यकारौ, क्रमजस्तृतीयः, तत्र मध्यमस्य वा लोपो भवति । शय्या, शय्य्या । अदितेरपत्यमादित्य्यः

---

1. वाक्यमिदं नास्ति ब. 2. उत्खनिः क. ड. 3. कर्तव्यम् इत्यधिकम् ब. 4. अघ्न्ये दूरमुत्कन्दः क, अग्नेरुच्यमुत्कन्दः इ, अग्नेस्त्वमुत्कन्दः ड. 5. पूर्वसवर्ण इति वर्तते इत्यधिकम् क. इ. 6. पदान्तात् इत्यधिकम् क. 7. अज्झलाम् अज्हलाम् इत्यधिकम् इ, षड्ढलानि षड्हलानि इत्यधिकम् इ. ह. 8. पदान्तात् इत्यधिकम् क. 9. षट्छोभनः षट्शोभनः इत्यधिकम् इ. 10. इत्येवमाद्यर्थम् क. 11. वाक्यमिदं नास्ति ब.